॥ ओम् ॥

# श्रीनीलकण्ठयमिवर-

विरचिता ।

## श्रीसौभाग्यलहरी
## श्रीविष्णुनवरत्नस्तुतिः
## अद्वैतकलाआर्याशती
## श्रीहरिभक्तिमरन्दस्तुतिश्च

---

इदंपुस्तकं

श्रीफणिभाष्यमुख्याखिलागमपारावारपारीण-
परवुर्विद्वहरिहरात्मजकृष्णशर्मभिः सं-
शोध्यमुवात्तुपुपवालानिकाट्टु-
पप्पुपिल्लै इत्येतैः- ।

—:०:—

श्रीकाश्यां
हरिदास गुप्त इत्येतेषांविद्याविलासयन्त्रालये-
ऽङ्कयित्वा प्राकाश्यं नीतम् ।

---

सन् १९०२



*Sri Nilakandha Yogin.*

श्रीहरिः ।

# ॥ श्रीसौभाग्यलहरी ॥

## ॥ श्री दक्षिणामूर्तिलहरी ॥

वयःप्रेप्स्येष्यच्छ्रीमकुटतटपीठायितपदो
वचोवैचक्षण्यप्रकटनगुरुत्वे भवतु मे ।
यदीशं दक्षास्यं फणिपतिगिरादुर्भणमपि
प्रणौमि व्रज्येज्याऽजितममृतधारं परगुरुम् ॥ १ ॥
किरत्वन्तज्यौतिर्विभुरिह ललाटंतपलिवि-
करार्णक्रीतं मद्धृदयपरितापं जडमपि ।
चलत्पेयूषाब्धिस्मितकवलिताण्डप्रतिभटो
हरः संवित्सान्द्रोदरथिरुप उन्मार्गतमसः ॥ २ ॥
अवज्ञासीमैनं परिणतशरच्चन्द्रसुभग-
स्त्वमानङ्गाङ्गागानल निखिलदेवाँल्लघुधिया ।
समुज्झित्वा त्वाऽऽप्यं शरणमितमानन्दसुधया-
ऽऽप्लुतं धेयाः किन्तु प्रकृतिमृदुलैरीक्षणशतैः ॥ ३ ॥
कुमारादिप्रज्ञाश्रितजडिमसंक्षोदपटिम-
प्रवेष्टाग्रोद्बद्धाद्वयवचनचिन्मुद्र इह मे ।
स्वभूरग्रे भूयाल्लघु नयनयुग्मं मम फले-
ग्रहिं कर्तृ नित्यं निगमशिरसा लक्षितपदः ॥ ४ ॥
विभो यं त्वां धातृप्रभृतय उपानुग्रहगणै-
रिति त्वालोकालोकत इदमिहत्येतमवितुम् ।

महेन्द्रीयागात्प्रत्यज भव ममाभीष्टकरणे
न चेद्विश्वासोऽस्यापथगतिवशादस्तमयते ॥ ५ ॥
श्रुतौ यो ब्रह्माणं त्वज ह विदधातीतिमुखवा-
ङ्मयं सौधं स्वस्फूर्त्युदयजनकं पीतमभवत् ।
दृशा भोस्त्वच्छैष्ठ्यं वद वद नु गोपायितुमपि
त्वमीशो नो विघ्नस्तदवतु नो दक्षिणमुखः ॥ ६ ॥
ऋते चैत्ताद्धार्तात्क नु भवति शं शङ्करकरा-
द्विभीतद्राद्धौ वर्धितमिह सम्रं ना हसति हि ।
प्रसङ्गः कारुण्यामृतजलधिकल्लोलितदृशा
त्वमेको दातुं तत्प्रभुरिति वृणोम्येतदचल ॥ ७ ॥
वदान्यं यातोऽन्यं मनुभुवनलोकैकवसते-
रनाप्येष्टं दक्षास्यत इति भवेच्चेत्किमु परम् ।
तदानन्देन्दूघ्नं कुवलपतिकान्तं मम मनो
विधत्तामद्वैतश्रुतिशतशिरोमृग्यचरण ॥ ८ ॥
हृदुन्मोहग्राहग्रहगरगृहीतस्य नियतं
ममेशो बोधेनोदयविदितजीवातुवरदः ।
भव त्वं नान्यो ऽतः परमवनमस्येत्यपि गिरा
न दोषायास्याप्ताववधिगतपदः स्याद्यदव तत् ॥ ९ ॥
चिदादित्यस्योदित्वरकरभराभोगपविता-
न्तरङ्गांभोजं मां सुखयतु वदान्यः क इव भो ।
अहं तूच्छिष्टो भावत इति दृशाऽन्धीकृतदृशा
समश्चैवोज्झेत्तन्मयि कुरु कृपां दक्षिणशिव ॥ १० ॥
पुरांहन्तूरक्ताम्बककपितकन्तूरविपदं
मनोराजीवाख्यो जिगमिषति सर्वज्ञ भगवन् ।
भवेक्षातः संसृत्यपथनिविष्टत्सुस्तदवमा-

मभूमिः खानां त्वं शिव शिव कृपाभूमिरपि यत् ॥ ११ ॥
पुराऽऽरब्धं ज्ञानोदयत इतिमुख्यश्रुतिबला-
दनारब्धेत्यादिप्रबलतमकानीनवचनात् ।
तथेशोक्तेश्छिन्नं न च यदि कृतं कर्म मम चे-
न्नयैतच्छान्ति त्वं हर हर समाधेरिव दृशा ॥ १२ ॥
तनुं नाम्ना त्रैयम्बकचितिमयं ताम्यति परं
पुराराते मद्बुद्धिटप इह भो गर्वर इति ।
यदाश्लेषी नेयात्पुनरपि सुदुर्योवितपथं
घृणायास्तद्भूयाः पुरण इव तस्मिन्नतिमृदुः ॥ १३ ॥
अशुद्धेऽहं शुद्धस्त्वमिति मनुषे चेच्छिरसि ते
नृमुण्डस्रक्किं नानुचितमृतभूतिश्च वपुषि ।
तथा द्वैपंवासः फणप उत भूषा न भवतः
सतीत्थं त्वच्छाठ्यं स्फुटमज विधूयैतदव माम् ॥१४॥
प्रभो श्रीकण्ठायं कुकुर इव निस्तक्ष्य हृदयं
नियोज्येशे तदूदङ्भयकवलगृध्नुर्भवति हि ।
इदानीं त्वं दध्या इति निहितनेत्रद्वयमिमं
शिवेऽनालोच्याइवेव सुकरुणयावाङ्ग पशुप ॥ १५ ॥
दृढप्रज्ञस्त्वं वा ह्यहमिति तु निर्मोक्ष्यत इति
श्रुतं तद्वान्बोधादसितगल एषो ऽहमिति सन् ।
तपत्वद्याप्येवं कथमज हरिज्यैनमवितुं
विलंबोऽतः कार्यो नहि नहि कृपासौधजलके ॥ १६ ॥
हृदन्तःपूर्वाद्रिं तिलकयतु चिद्भातुरुदय-
न्स भर्गाख्यं तेजो विदितमिह यस्मिन्भगवति ।
यदंशुस्रक्सम्यग्घृदयदरजं धूनयति त-
त्तमस्तस्मान्नित्यं निरवधिकृपं तं प्रणुवति ॥१७॥

मनस्तापैकागारिक इव सुबोधोदयधनं
भवद्दासान्मत्तो मुमुषिषति रात्रिन्दिवमयम् ।
त्रिलोकीजानिस्त्वं नहि विशय एनं वसुहरं
प्रमथ्यास्माज्ज्ञानं सह निलयनं पालय हर ॥१८॥
जटाजूटो विद्युद्बहुलसहकृत्वाऽमृतघटी
घटी भद्रामुद्रा लिपिरपि च यस्यैव जगति ।
करे दक्षो भालाम्बक इतरयोः प्रस्नुतकृपा-
रसस्तस्माद्देवं परमज न जाने पुरहरात् ॥१९॥
यदालोकेन्दूग्रो भवति गदयित्नुर्यदि जडो-
ष्यथान्धो दक्षाग्र्येक्षणसदृशदृक्खञ्जक इह ।
स्वयं गन्तुं शक्तश्चटकवदतो मीरकरुणं
यजेऽन्तः संतापापहमहमजं दक्षिणशिवम् ॥२०॥
जगत्स्रोतः पुत्रीयति करुणया भृत्यमिह को
भवत्तोऽन्यः शून्यावसथविदथप्रेष्ठ भगवन् ।
अतो वृत्तेरन्धंकरणमवलुप्येश्वर भवा-
नमानस्यं हृत्खेऽमृतदकजवृष्टिं वितनुतात् ॥२१॥
विभोर्दक्षास्यस्याप्यहह भजनं चैव न सुखा-
करोति प्रेष्ठं यद्यवनमज किं स्वात्मन इह ।
भवेत्कस्माद्धेति स्वयमयनमग्रे तव किर-
न्वदैतच्छंभो मामव भुविकृपस्त्वं नतिरियम् ॥२२॥
व्यथानां पेष्टुं त्वं धियमृप सुखेनेश्वर निर-
ङ्कुशानन्दं दित्सन्नजयजन एवैष भवति ।
नभस्तः प्रां शम्भोस्तव वशाकुशाग्र्यात्मशरसं-
प्रयोगात्प्रापय्यामृतकलशधारां कुरु कृपाम् ॥२३॥
विभोरीक्षामैत्रावरुणमुनिराडाचमितसन्

मनोधैर्याभोधिर्वृणुत इति मां मुक्तिरमणी ।
शिवालोकं याचे सुरपुरतरुं शंभुमचलं
तदर्थं चिद्रूपं सपदि शतकृत्वः प्रणिपतन् ॥२४॥
हृदाबाधां शंभो कथयितुमजान्तर्मम मन-
स्युदेष्यत्तापार्कं नयतु तव दृग्रात्र्युपगमः ।
क्षणादस्तं भूयः सुखजलधिचन्द्रं प्रणयता-
त्प्रकाशं त्वां नित्यं त्रिविधकरणैरीश्वर यजे ॥२५॥
अयं पोतः क्षीरस्यति मृदुमनाः शंभुकरसं-
स्थिरं सान्द्रानन्दात्मकमज नियच्छंस्तदधुना ।
अवैनं दत्तं न क्षरति हि लुभित्वाऽस्य विगमं
कृथा मास्मिंस्तद्धारय परिणमज्ज्योतिरुदय ॥२६॥
मनःशुक्रभर्मेत्थं सुदृढनिकषाश्मन्यज इदं
विभो घृष्ट्वा लीनं तनुम इति नो ऽन्तर्द्रढयति ।
घृणां कुर्वन्तस्तत्परमशिव देवेश भगव-
न्नमस्याज्ञं दध्मोऽखिलवलयितानन्दमसृण ॥२७॥
यदत्यल्पं ताम्यत्यपि निरपराधप्रकृतिभू-
प्रतिष्ठां मत्स्वान्ताभिधमठरमाहां पशुपते ।
तदन्तर्मे मन्त्वर्जुनकरवनीलुञ्चनविधिं
कुठारी ते कुर्यादिति नम इदं रामगुरवे ॥२८॥
पुरारेर्दृक्कुम्भाज्जनिमितकृपागस्तिरचलं
ममान्तःकृड्विन्ध्यं लघयतुसुखेन्दूद्भवविधये ।
विधत्ताब्धिस्ताकाशत उपरि चार्द्रत्वमिति तं
हृदा धत्ते कृत्तेभपसिचयमीशं परशिवम् ॥२९॥
परानन्दप्रेप्सुः शिवनिलयनोत्तंसमुप भोः
सुषुप्सत्येषोऽर्भः सुखमज दधीथा अवसरम् ।

विभौ तिर्यङ्कारंगत इति भवेत्स्वाप्ययपदा-
च्छिलाय त्वय्यानन्दथुमपि वृणोत्यर्थमसकृत् ॥३०॥
भ्रमन्तं त्वं मेऽन्तर्गिरमुप मुनिर्मूल्य सुखभू-
रुहं जाड्यस्तम्बेरममिह घृणान्दूनिगडितम् ।
विधास्यंस्तं नीत्वा बहिरथ विमर्द्येश कृपया
सभूमिं वेदं मां धर पशुपते नौमि चरणम् ॥३१॥
कटाक्षस्यन्दोदक्षपिताशिरसं मां विधिमुखा-
नमच्चूडापीडोपलसुमसृणीभूतचरणः ।
क्रियाच्छंभुर्नित्यं वटनिकटवास्यौपनिषदो
नमस्याम्नैनैतं वरिवसितमेवैष कुरुतात् ॥३२॥
निजानन्दोदान्धोःप्रतिहरिवतंसाङ्ग भवते-
ऽपराध्यत्यन्धोः यः सुखयति न तं शंकरभवान् ।
प्रसद्धः सन्स्वस्मा अररुमभिराध्यन्तमजव-
त्प्रणम्रीभूतं किंत्विति नियतमीशं हृदि भजे ॥३३॥
सुषुम्नायामन्तर्दृढिमरमणीयत्वमुपय-
न्निरीक्षेऽक्ष्णांदूरं शिवपदमदूरं त्विति धिया ।
भ्रुवोर्मध्यज्योतिर्मकुरनिकुरम्बादरविधिं
विधास्यत्यस्मिन्कस्तव भव विलंबोऽन्नगमने ॥३४॥
हृदाविदूदुर्हृद्भ्राट्यटपतिहर्ति कारय पुरां
विकापिन्द्रकुसूरान्वयभवकृपादाशरथिना ।
अमन्दं मन्दं त्वं नियमय ततोऽस्यावनमनाः
परात्मानं त्वां भोः प्रणिपतति सोऽयं पुरहर ॥ ३५ ॥
मनोऽटव्यां भ्याखेटिक इह चरन्घुर्घुररवा-
दविवेकप्राग्भारोदितमुनिजनं भ्रंशयति यत् ।
समाधातस्तत्त्वं हर दुरपवाहं शुनमिमं

क्रथित्वा निर्बाधं कुरु सनिलयं मां मुनिमज ॥३६॥
उदेत्वस्यान्तर्भूधरवरदरीसंश्रितमह-
त्तमोलुण्टाकः श्रीहरचरणपीयूषकिरणः।
विलुम्बन्हृज्जूर्तिं त्वमृतनुतजीवातुवलतः
सुखं धत्तेऽयं तत्कृत इह निवृत्ते हृदि शिवम् ॥३७॥
सदामेऽन्तर्मोदं परमशिवहृत्कल्पविटपी
कृपाख्यक्षीराब्ध्युक्षित इह सुखं पक्ष्मलयतात्।
इदं नामान्वर्थं न्विति विशयलेशः सहृदयं
नचालंकुर्यात्तद्रुतवरविधाने त्वरयतु ॥३८॥
विभङ्क्तुं दुश्चिन्तोपलबहुलिताद्रिं भवघृणा-
दधीच्यृष्युत्थोद्यत्स्मितभिदिरमीशानुमतितः।
सुखेनैवं सत्यद्वयवयुनमात्रे परशिवे
प्रतिष्ठां विन्देयं हर वरमतो देहि भगवन् ॥३९॥
हृदन्तःसन्तानद्रुममपि च मुत्कोरकितमा-
स्तृणञ्शंभोर्हृद्दोहद व्रज समीपं मम सुखम्।
द्रुतं सौषुम्नेन्दूदकविहितधारं शिवमहं
सदा दध्यां यत्त्वन्निलयनममेयं पुरहरम् ॥४०॥
विधातुं सौख्यं मामकजरठहृत्पादपिभृतउ-
द्भवात्सोऽहं शंभोस्स्मितकथितपीयूषमिह ते।
परं याचे त्वाऽस्मान्मदुपरि कृपां धारय परा-
मितीशं त्वां शून्ये यज उरुधिया सोमजलतः ॥४१॥
भजेऽहं कैवल्यारर भिदिपदं ते पशुपते
व्रजेयं स्वस्थानं यदुपकृतितोऽनन्यसुलभम्।
प्रभो नित्यास्यानुग्रहणसमयोऽयं भवति य-
त्तदेनं मां शंभो सुखजलनिधिं कुर्वज हर ॥४२॥

वधूर्दक्षास्यार्चा हृदयकमरं मामकमपि
स्थजेतेति प्रीणात्यहरहरिमां ध्यानबलतः ।
पृणन्सोऽयं यस्यां लगित इति बाढ्ङ्क्षाहि परा-
मतो नित्यं शंभुर्भवतु विवरीतुं सुखसुधाम् ॥४३॥
तपस्यन्तं भिक्षुं निगमवचसा दर्शितपदे
महिम्नि स्वस्मिन्संस्थितिमधिगतः सन्पशुपते ।
सुखीकर्तुं नैनं हृदयमज ते सेत्स्यतिघृणा
न जानेऽपादानं विषय इह किञ्चित्यवतदीट् ॥४४॥
त्रिलोकीरङ्गाङ्गन्नटनचटुलोपज्ञलजतो
विभो युध्यत्यस्यान्तरकमलमुत्प्रेप्सुरचल ।
युधे शंभो यत्तुम्फितमथ तदीयात्पदमत-
स्तदर्थं कुर्यास्त्वं निरवधिकृपां नम्रक इह ॥४५॥
सदा तुर्याधुर्यादरकरणभूवित्तमज मे
ददस्वान्तर्मोदं हर शिशुशशिश्लाघ्यमकुट ।
यदाप्तौ त्र्ययन्तोदितपदसुगत्या समरसे
निमग्नः स्यां शंभो त्वयि मयि कृपां तद्धर पर ॥४६॥
स्वभूचन्द्रज्योत्स्ना हृदयकुवदेश्यश्रिततमो
निरस्य प्राकाश्यं धरतु नितरामस्य सदयम् ।
कलापूर्णं तं धारय इह गिरेर्मूर्ध्नि समता-
वशं शंभो तस्मान्मयि करुणया त्वं भव भव ॥४७॥
त्वदन्यः शून्योऽत्र त्रिभुवनतले वन्दथ इव
प्रभो यत्पद्रेणुप्रमुषिततमस्का विधिमुखाः ।
इति त्वामेवैकं शरणमितमेनं सुखसुधा-
निधिं धत्स्वानन्दामृतकलशबाहेश्वर हर ॥४८॥
सुधासिन्धुश्रीमोषणविरुदुदञ्चत्पुरहर-

स्मितश्चैत्यं शैत्येन च हृदि विवर्तं भवतु मे ।
परप्रेमावासे सति हि विवरीवृत्यत इदं
जगत्सर्वं रज्जौ भुजगवदहो यद्भगवति ॥४९॥
शिवं ज्ञात्वा सर्वं विगलितभिदं पूर्वमथ त-
द्विदित्वा स्वत्वेनेश्वर तदपि संत्यज्य सुखतः ।
अहो संविद्रूपे स्तिमितपरचित्यद्वयपदे
रमे नैजानन्दामृतरसिकभावेन सुहृगोम् ॥५०॥
निर्मूलकाषंकषितान्तरान्ध्य-
हंसस्य बालाह्वमुनेः प्रसादात् ।
श्रीनीलकण्ठोदितचित्सुधाधा-
राग्र्यामिमां ध्यायतियः स मुक्तः ॥ ५१ ॥

इति श्रीनीलकण्ठयमिवरविरचिता सौभाग्य-
लहर्याख्या दक्षिणामुर्तिलहरी समाप्ता ।

श्रीहरिः ।

# श्रीविष्णुनवरत्न प्रारम्भः ।

वृत्रप्रध्वंस्यरिद्गद्भुतचरितभरामोदपाथोऽवगाढुं
स्वर्गंगाखर्वगर्वैकपमृजुरतिभूर्मन्मनोमत्तहस्ती ।
चित्खाटाटामुशन्यात्यज जनिहर पीयूषमीरत्कृपातो
भाव्यं तस्मिंस्त्वयाऽस्मात्परतरपरमानंद विष्णो नमस्ते॥१॥
भूयात्स स्फूर्जथूराजितकरधृतसत्पाञ्चजन्योत्थपञ्चा-
स्यारावोत्पिपृपुद्वारुद्धृदयमदोदग्रदन्तावलोऽजः ।
रक्षणेऽभीक्ष्णं विभोस्तत्पदधृतमनसोऽस्यापुनर्जन्मयच्छं-
स्तस्मा आनन्दचन्द्रामृतरसरसिकेशेश विष्णो० ॥ २ ॥
भेदज्ञानोदकस्रुक्स्नपनविधिकृतेरानुपूर्व्युज्ञउच्चै-
स्सच्छास्त्रालोकहालोद्वहनमसृणितेऽद्वन्द्ववेद्यन्तरस्थे ।
हृत्क्षेत्रे तत्प्रलक्ष्यं वप बहुकृपयेशाङ्ग भावत्कमित्थं
संवित्सस्यं भवार्णोनिधिहतिवडवाग्नेऽज विष्णो० ॥३॥
स्वाबुङ्कारं गिलन्तं विषयकलममुच्छातिवृत्याऽप्रशस्तं
चौरङ्कारं शपन्मद्धृदयशुकशिशुं संक्लिशित्वाऽस्मि सुस्थः ।
तद्भोः कारुण्यसंज्ञागुफितमज वितंसं त्वमाप्यात्मसात्त्वं
कृत्वा सच्चित्सुखैकात्मकमपि कुरु देवेश विष्णो० ॥४॥
सर्वीयं कार्यजालं विदधतु विधिरुद्रेन्द्रमुख्या ऋते सं-
पत्तेस्तद्वीर्वृतास्ते श्रवसि कृतकरा आस्य तं यांत्यनीशाः ।
लुञ्चित्वा पञ्चपापान्यपि परिणतचित्केवलत्वं विधातुं
त्वंवत्कारुण्यवार्द्धिस्त्वमज विजयसे देव विष्णो० ॥ ५ ॥

कैलासाद्रीन्द्रवादी हयमुखखिदिरः सन्मनःखे ह्युदीया-
द्यावन्मन्थक्ष्माभृद्घुमुघुमितसुधावारिराशिप्रकाशाः।
तावन्निर्याति तत्कात्भणितय इति नो वच्म्यहं गौणवृत्या
वैकुण्ठावाजमां त्वं कपितपुरनतानन्त विष्णो० ॥ ६ ॥
वीणादण्डस्थशुष्युद्गतभुजगवधूश्चक्रजालं पवित्वा
गत्वा शम्पाभमुच्चैरमृतकुहरमुत्क्षिप्य सोमं दधाति।
मह्यं तत्प्लावितात्मा परमरसमजंस्त्वत्त उत्स्यामभिन्नो
यस्मान्मन्दारचन्दायितपरमकृपाधार विष्णो० ॥ ७ ॥
नर्चल्येशोऽजमित्याविलहृदयममुं मानुमंस्थाः सुरद्रुक्
कक्कोमष्लुष्टवीतामृतपद विषयं पश्य सत्ताकतोऽस्मिन्।
त्रैलोक्ये चोपमानं त्विति नुवतु कथं त्वां भियामूढ उच्चा-
स्त्रावेशे तन्मृपित्वा सकृपमिममवानन्त विष्णो० ॥८॥
सोरस्ताडं व्रजन्नोदिति बत भगवन्कस्य वाऽग्रेऽत्र संसृ-
त्यम्भोधौ त्वत्प्रहाणेऽमरनतपद भोश्शाम्भवीघ्रस्तु भूमन्।
तत्त्वं भीभिद्गताम्यद्धृदयमिममजन्नग्रतः संप्रपाद्य-
ङ्गाविश्राम्यत्सुधासान्द्रितसुखमृपयन्कृष्ण विष्णो नमस्ते ९
श्रीबालनामभगवच्चरणारुणाब्ज-
हंसायितासितगलोदितमेकभक्त्या।
विष्णोर्नवोपलमिमं नवकं दधाति
कण्ठे य एष उभयत्र भवेत्स्वराट्सः ॥ १० ॥

इति श्रीस्तवरत्नहारान्तर्गतं विष्णुनवरत्नं समाप्तम्।

# श्रीमच्चित्सुधाधारा प्रारभ्यते ।

## श्रीहरिः ॐ तत्सत् ।

यस्याज्ञानाज्जगतो भानं स्वप्नेन्द्रजालवत्स्वचिति ।
यज्ज्ञानात्तद्विलयस्तं कृष्णं सच्चिदद्वयं वन्दे ॥ १ ॥
जनुषामुत्तममाप्तः कोऽहं कः स्यां किमेतदित्येवम् ।
नैव विविच्यासकलं पश्येद्भ्रम्यमाणहृदयतया ॥ २ ॥
योऽयं घातुक उदितः स्वस्यैवेतः परं नु शोच्यं किम् ।
तस्मान्नर इह जातो वैराग्यं संश्रयेत्परं सुखदम् ॥ ३ ॥
आवैरिञ्चं भोगं क्षुद्रं मत्वा तृणाय यस्त्यजति ।
वैराग्यस्य तु परमां काष्ठां प्राप्तोऽयमुच्यते सद्भिः ॥ ४ ॥
कोऽपि न चरितार्थः स्याद्भोगेनाग्निर्न यत्समित्तृप्तः ।
मत्वाऽऽगन्तुकमखिलं त्यक्त्वा भयो न चालयेच्चित्तम् ॥५॥
जातंजातं विषयं स्वादुङ्कारं सदा समास्वाद्य ।
तृप्तिं नेयान्मनुजो हा मण्डूकायते रिपुग्रहस्तः ॥ ६ ॥
नर इह नृवरत्वं सोऽप्येकच्छत्राधिपत्यमिच्छेत्सः ।
गान्धर्वं पदमस्य तु देवत्वाकांक्षया मनश्चलितम् ॥ ७ ॥
स्याद्देवानामैन्द्रं पदमस्त्वित्यन्वहं परो मोहः ।
इन्द्रोऽपीच्छति नितरां स्वाराज्यं सोऽपि वैष्णवं द्रुहिणः ॥८॥
नैवैतेषां निर्वृतिरानन्दाधिक्यवाञ्छया सततम् ।
शतवृध्योत्तममपि लब्ध्वाऽऽनन्दं दुःखितो भवेत्प्राणी ॥९॥
द्वयमिदमाब्रह्म स्यात्सर्वसमानं सुखं तथा दुःखम् ।
सम्मिश्रं जलपङ्कवदेकस्यानन्तरं भवेदन्यत् ॥ १० ॥

वेदयुगानां साहस्रान्तेऽस्माकं भवेद्दिनं यस्य ।
प्रलये प्राकृत उदिते कालवशोऽयं नृणां कथा का स्यात् ॥११॥
भोजनमैथुनमरणाद्यन्ते नृणां भवेन्मतिर्याऽत्र ।
कोऽमुक्तो बन्धनतो यद्येषा सार्वकालिकी भवति ॥ १२ ॥
दिवसे दिवसे स्वाध्ययपर्यन्तं तुल्यकर्म संश्रित्य ।
जीवेन्न लज्जते यः प्राज्ञस्तस्मान्नृणां पशुः को नु ॥ १३ ॥
आहाराद्यास्सकलप्राणिसमाना विमुक्तिरेतेषाम् ।
मध्ये मनुजस्यैव हि तस्याज्यं मूलतो हृदा निखिलम् ॥१४॥
भोजंभोजं मृगतृष्णांबुसमानं विषाधिकं विषयम् ।
यानि दिनानि गतानीत्यालोच्याशां निराशतां नयतु ॥ १५ ॥
आशावेश्या मनुजं दूरादाकृष्य दुःखसिन्धुगतम् ।
कुर्यान्निर्जलमरीचितोयं यद्वन्मृगादिकं ग्रीष्मे ॥ १६ ॥
संश्रयतीह मनुष्यो यामेव गुणश्रियं तु तृष्णा ताम् ।
कृन्तति तन्त्रीं मूषिक इव चिन्तात्यागतो विजेयैषा ॥ १७॥
भ्रान्त्वा बहुशो विषये सुखिनो न स्युर्नरा यथा शुनकः ।
आज्याक्तां क्षुरधारां जिह्वालीढां विधाय नात्र सुखी ॥१८॥
कूलङ्कषा स्वतीराद्वल्लीं हृत्वा व्रजेद्यथा क्षणतः ।
तृष्णानिर्झरिणी तच्चित्तं दूरीकरोति दुर्ग्रहणम् ॥ १९ ॥
इन्द्रियभोगः सर्पादतिविष इत्यत्र नैव सन्देहः ।
फणिदष्टः कोऽपि हतः स्यादेकत्रान्यतोऽर्बुदे जनुषाम् ॥२०॥
आगच्छति यद्गच्छति चैतत्क्षणिकं सुखं विरज्यास्मिन् ।
स्थायिसुखे यो रक्तः सोऽयं भूयो न जायते नृवरः ॥ २१ ॥
संस्पृष्ट्वा क्षरविषयं सुखभाक्स्यामित्युदेति यस्य मतिः ।
तद्धृदयेऽस्य वियोगो भूयः कटुकण्टकायते सुचिरम् ॥२२॥
स्पर्शाभोगे मनुजः सन्धुक्षितवह्निवद्भवेद्रागी ।

अप्राप्तौ तृष्णाया मूर्छामेत्यायुरन्तमृच्छेद्वा ॥ २३ ॥
केनाप्यलेपेनास्मिन्सुखमुत्पश्येद्विचारवान्नैव ।
नृखरो ऽपश्यन्स्वयमपि पश्यत्यारूढपातितो विषयैः ॥ २४ ॥
किन्तु विपर्ययतोऽसौ पश्येत्कौलेयको यथा हतकः ।
रक्तं स्ववक्त्रपीतं शुष्कास्थ्नः स्यादितीह खादति यत् ॥२५॥
पञ्चभिरपि शब्दादिभिरापुः पञ्चत्वमेव जीवगणाः ।
मृगकरिपतङ्गमीनालिन इह बद्धोऽखिलैर्नरः किमुत ॥ २६ ॥
भोगश्चोरोऽटित्वा ऽऽज्ञाननिशायां प्रसह्य हरतेऽत्र ।
गुणनिधिमेकं दुःखी तस्मात्सञ्जायते महांश्च जनः ॥ २७ ॥
अमृतप्राप्तिनिमित्ते खाते स्वं यद्धतं करोत्येकः ।
स्वेच्छावशान्नृदेहान्मोक्षार्हात्स्वं तथा च्युतं कुरुते ॥२८॥
कौलेयो यो युक्तोऽयुक्तः कौलेयको भवेत्पुरुषः ।
तस्मात्प्रपञ्चयुक्तो युक्तो भूयात्समस्तसंत्यागात् ॥ २९ ॥
यद्देहेऽहंभावस्तद्दुष्टाच्छुक्रशोणिताज्जातम् ।
एते भूमौ दृष्ट्वा नोद्धारं कः करोति सद्वृत्तः ॥ ३० ॥
तस्मादमेध्यजाते नाडीद्वारे सपूय एवैते ।
नारीभगे नृकीटाः सक्तास्सन्तस्त्यजन्त्यसूंश्चैव ॥३१॥
मांसं त्वचा पिनद्धं मरकतवैदूर्यरत्नसंघटितम् ।
हेमाचलनीकाशं पश्यन्मुग्धोऽत्र वध्यतेऽतिजडः ॥३२॥
आपातदृष्टितो यन्मूढानां भाति पेलवः शिखरी ।
नेदिष्ठो ऽसौ परुषस्तन्मांसं पश्यतां कुचद्वन्द्वम् ॥३३॥
मुक्तादामविभूषितकुचयुग्मं योषितां श्मशानान्ते ।
श्वभिरास्वाद्यत एतल्लघुपिण्ड इवान्धसो विविच्यात्तत्॥३४॥
स्त्रीवक्त्रमेवचेन्दुं वक्ष्यंत्यज्ञास्तु ये विटाः कवयः ।
ते शास्त्रसिन्धुमग्ना नूनं क्षारांबुसंप्लुताक्षिगणाः ॥ ३५ ॥

स्त्रीवागुरानुबद्धा माभूयासुर्नृपत्रिणस्सुजनाः।
क्वचिदपिसंदृष्टैतास्स्वात्मानं संप्रतारयन्त्यहहा ॥ ३६ ॥
जांगलिको ऽत्र विमोक्ता किल सर्पादंशयुक्तपुरुषस्य।
नारीगरलाज्ञाने नोद्धर्तुं रागनाशतस्त्वितरम् ॥ ३७ ॥
मणिनागो ऽतिमनोज्ञस्तत्स्पर्शाद्दर्शनेन वा म्रियते।
म्रियते न स्त्रीदष्टो मरणाधिकतापवान्भवेत्तु चिरम् ॥३८॥
कार्कोटमुख्यनागान्न विभेम्यहमेकतस्तु योषायाः।
भीतियुतस्तद्बाधाशस्त्रं वैराग्यमेव दीप्तमिह ॥ ३९ ॥
त्यज शङ्कां भज तस्माद्विरतिमहाराजमाशु सौख्यकरम्।
तत्कृपया शत्रुगणं खण्डंतनुयाः सहस्रशो मतिमन् ॥४०॥
श्लेष्मागारं वक्त्रं विदुरंके लोष्टमेव विंबोष्ठम्।
आसां दर्शनमात्रे ध्यायेत्प्राणं नियम्य चात्मानम् ॥४१॥
शास्त्रविशेषसुदर्शनमप्युपनिषदां परीक्षणं चास्तु।
एतत्परिषदि कथनायालं दूरे विरक्तिरित्येषा ॥ ४२ ॥
विलुठद्वीचिसमे स्यादायुषि विद्युच्चलेन भोगेन।
किं फलमेतद्ब्रूयान्मोहान्धः कोऽपि भोगभुग्ज्ञात्वा ॥४३॥
धनमपि चित्ताकर्षणमेककपर्दात्त्यजेदसूंश्च नरः।
सोऽप्यनुगच्छति किं स्वं गच्छन्तं मृत्युवक्त्रमत्युग्रम्॥४४॥
अत्राधिक्षिति को वा मुक्तः स्यान्मृत्युपाशतो लोभी।
पञ्चदशानर्थैर्धनमुपजुष्टं सञ्चयी न भूयात्तत् ॥ ४५ ॥
उद्दिश्य यःशरीरं भोग्यं सम्यक्चिनोति नरशूलः।
यत्तद्देहस्थैर्यं पल्लवकोट्यंबुसम्मितं चलनात् ॥ ४६ ॥
वीचीग्रथनं वायोर्बन्धनमाकाशखण्डनं च भवेत्।
क्वचिदप्यास्था नायुषि परिदृष्टा युज्यते न वा तद्वत् ॥४७॥
जातः स एव भूमौ यः सम्यक्साधुजीवितः परमः।

जायेत नेह भूयो जरठखरास्ते भवन्ति शेषा ये ॥ ४८ ॥
एते नैव ममाहं नैतेषां स्यां पदार्थनिचयानाम् ।
आस्थायैतं निश्चयमनुसन्धत्तां वृषाकपिं सततम् ॥ ४९ ॥
अर्थानां चित्तमिदं कारणमस्मिन्प्रतिष्ठितं त्रिजगत् ।
अमनस्त्वं गमिते तन्मनसि चिदेका मनश्चिकित्स्यं तत् ॥५०॥
इह कथितौ द्वौ मार्गौ चित्तविनाशाय सांख्ययोगौ तौ ।
सांख्यज्ञानं वक्ष्ये ऽत्रोक्तो योगो रहस्यकौमुद्याम् ॥ ५१ ॥
संख्यायते ऽत्र संख्या सम्यग्दृष्टिर्भवेच्च सा ऽत्रैत्यर्थ ।
सांख्यं साक्षाज्ज्ञानं तस्माच्छ्रुत्युक्तमात्र कपिलोक्तम् ॥५२॥
अत्यन्ताकुलमनसो नैव विचारात्स्वरूपसंसिद्धिः ।
सो ऽयं योगी भूयाद्यो मोहादेव संवृतात्मा सन् ॥ ५३ ॥
अव्याकुलधीस्तस्य तु विहितः पन्था द्वितीय उरुगीतः ।
सांख्यसमाख्यः फलदो द्रागभ्यासं करोत्वमन्दं तत् ॥५४॥
अत्राप्यात्मविबोधकशास्त्रालोको ऽथ साधुसंसर्गः ।
प्राणस्पन्दनिरोधनमेवं निःशेषवासनात्यागः ॥ ५५ ॥
युक्तय एता मनसो विजये ऽङ्कुशवद्द्विपेन्द्रदमने स्युः ।
प्राणस्पन्दनिरोधः कर्तव्यो राजयोगिनैवं तत् ॥ ५६ ॥
अस्तमिते ऽपाने हृदि प्राणो नोदेति यावदभ्युदिता ।
तावत्कुम्भावस्था योगिजनैर्या ऽनुभूयते सरसम् ॥ ५७ ॥
याते ऽस्तं बहिरनिले प्राणे ऽपानो ऽपि नोद्गतो यावत् ।
पूर्णां समामवस्थां तावज्जानन्ति कुम्भकं बाह्यम् ॥ ५८ ॥
बुध्वा ऽऽत्मानं विजने तारं जप्त्वा विधानतो ऽनुदिनम् ।
जेयं चित्तं क्रमशो सूध्यानाद्वा गुरोरनुज्ञातः ॥ ५९ ॥
मुक्त्वाऽहंकृतिमचलब्रह्माकारेण या मनोवृत्तेः ।
सान्तत्यस्थितिरन्याऽनन्तरितेयं समाध्यवस्था स्यात् ॥६०॥

तत्त्वाववोध एवाशयतूलाग्निर्नृणामसावेकः ।
प्रोक्तः समाधिशब्देनेह न तूष्णीमवस्थितिः कथिता ॥ ६१ ॥
ध्यातृध्यानापोहे ध्येयस्यैवैकतानता मनसः ।
सम्प्रज्ञातसमाधेत्युदितादन्या निवातदीपाभा ॥ ६२ ॥
द्योवाय्वग्निजलोर्वीष्वाब्रह्मस्थावरेऽपि चाभिन्नाः ।
सच्चिन्मुख्या भिन्ने द्वितये ते रूपनामनी त्याज्ये ॥ ६३ ॥
सच्चित्सुखैकसक्तः पश्चाद्धृदये ऽथवा बहिः कुर्यात् ।
सततं समाधिनिष्ठां यस्यां दोदुह्यतेऽमृताम्बुधुनी ॥ ६४॥
मूढा घोराश्शान्ता मनसः स्युर्वृत्तयस्त्रिधेत्येवम् ।
भीमोहाद्या मूढास्तृष्णालोभादिकास्तथा घोराः ॥ ६५ ॥
विरतिक्षमादिकोक्तास्सम्यक्सात्त्विक्य एव शान्ताख्याः ।
वृत्तय आसु चिदेका सुखमपि शान्तासु विंवितं भवति ॥६६॥
कर्दमिताम्भोविम्बितचन्द्रोऽस्पष्टः स एव शुद्धदके ।
सुव्यक्ततया दृश्यस्तद्वद्ब्रह्मापि वृत्तिषु द्विविधम् ॥ ६७ ॥
आनन्दांशतिरोभव इह मूढादिद्वयोश्च मालिन्यात् ।
वृत्योश्चित्प्रतिफलनं दभ्रं नैर्मल्यतः समाख्यातम् ॥ ६८ ॥
शुद्धजले शिख्यौष्ण्यं सङ्क्रमते नात्र तत्प्रकाशो यत् ।
काष्ठे प्रकाश औष्ण्यं चेत्थं शान्तासु चित्सुखे व्यक्ते ॥६९॥
यद्यत्काङ्क्षोपरमे वृत्तिष्वन्तर्मुखासु सुखमात्रम् ।
प्रतिबिम्बति तद्ब्रह्मैवास्य विचारस्त्वतीवसुखतः स्यात्॥७०॥
सत्ता चितिः सुखं चेत्येवं ब्रह्मस्वभाव उदितः स्यात् ।
त्रेधा भ्रह्माण्डादिषु सन्मात्रं ब्रह्मणो विविच्यास्मिन् ॥७१॥
अन्यत्र नामरूपे चोत्सृज्यैवं विचिंत्य जाड्यांशे ।
सच्चित्सुखे स्वमनसो नैश्चल्येनावतिष्ठ मुच्येथाः ॥७२॥
सविकल्पनिर्विकल्पभेदाद्धृदये द्विधा समाधिः स्यात् ।

दृश्यानुविद्धशब्दानुविद्धभेदाद्द्विधा पुनश्चाद्यः ॥ ७३ ॥
कामाद्याश्चित्तगता दृश्यास्तत्साक्षिरूपचैतन्यम् ।
साक्षित्वेन विभावय सततं दृश्यानुविद्ध एवासौ ॥ ७४ ॥
सच्चित्सुखस्वरूपोऽसंगोऽद्वैतस्तथा स्वयंज्योतिः ।
अस्मीतिशब्दविद्धः सविकल्पसमाध्यवस्थया ज्ञेयः ॥७५॥
अनुभूतिरसावेशात्त्यजतो दृश्यं तथैव शब्दं च ।
स्यान्निर्विकल्पशब्दवाच्यः सुतरां समाधिरतिरम्यः ॥७६॥
सम्प्रज्ञातसमाध्यनुशीलितचित्ते प्रशान्तवृत्तौ तु ।
परमानन्दमणीमयदीपककलिकोदयः समाधिः स्यात्॥७७॥
हृदये प्रकाशशून्यं शून्याच्छून्यं बहिश्च सर्वत्र ।
सर्वत ऊर्ध्वाधः परिपूर्णं सच्चिद्रसः समाधिः स्यात्॥७८॥
हृदि वद्बाह्ये ऽप्येवं यस्मिन्कस्मिंश्च वस्तुनि स्वैरम् ।
कुर्यात्समाधि,मादेस्सत्ताया निह्नवेन जाड्यस्य ॥ ७९ ॥
एवं समाधिनिष्ठामनुतिष्ठत उद्धतो महामोहः ।
नष्टो यदा स्वदेहे सर्वत्र मनोगतिः समाधिः सा ॥८०॥
ऐदंपर्यं वक्तुं वेदान्तस्यौचिती समा ऽप्येवम् ।
सम्यगपोद्यत इह समदृष्ट्यै प्रतिपक्षभूतदर्शनवाक्॥८१॥
केचिज्जिगीषयैवं वक्ष्यंत्यसतो जगज्जनिं मूढाः ।
अन्ये कुतर्कवादिन उच्चैर्घुष्यन्ति नित्यमेतदिति ॥ ८२ ॥
कारणमसदितिवादी प्रष्टव्यस्तत्पिता नु वन्ध्यार्भः ।
एवं नोचेत्तज्जनिरसतो जन्मास्य सिद्धमत्र कथम् ॥८३॥
शक्त्या स्वस्यासत्स्यात्कारणमिति चेन्न शक्तिरप्यसतः ।
सद्बीजस्यैवान्वयव्यतिरेकाभ्यां स्वकार्यजनिशक्तिः॥८४॥
निर्वचनानर्हमिदं जगदेवानित्यमत्र चिन्तयताम् ।
स्याच्चेन्नित्यमिदं कथमुत्पत्तिनिरोधभृद्भवेदग्रे ॥ ८५ ॥

सावयवत्वात्पृथ्वी घटवद्भवनाशसंयुता ह्युदिता।
यद्यत्सावयवं तन्नाशवदिति व्याप्तितः क्षरा नूनम् ॥८६॥
कापिलकाणभुजादिकमाविलमिह नो मतं भवेद्ग्राह्यम्।
आर्षमपीति समासाद्यक्ष्ये रोमन्थितं बहुज्ञैस्तत् ॥ ८७ ॥
कश्चित्कपिलो नाम्ना नेश्वरमङ्गीकरोति चितिरूपम्।
प्रकृतिं साम्यावस्थामेवोक्त्वा कारणत्वतो जगतः ॥ ८८ ॥
बुद्धिमतैतत्स्वधियैवालोच्याजस्रमाशु संत्याज्यम्।
जडरूपायाः प्रकृतेर्जनिरस्य कथञ्चनापि नेत्युक्तेः ॥८९॥
पयसो जडतायामपि वत्सस्य विवृद्धये भवेच्चेत्तत्।
चेतनमेकमधिष्ठायैवं प्रकृतिर्न कारणं जगतः ॥ ९० ॥
नाचैन्यात्प्रभवितुमुत्सहते न प्रधानमथवा तत्।
स्याच्चेन्निसर्गकरणं नित्यं सर्गप्रसंग इति दुष्टम् ॥ ९१ ॥
कापिलमपि चाकर्तैवाहो भोक्ता यदीह भवति पुनः।
कृतहान्यकृताभ्यागममुखदोषो ऽसंग एव भुक्तिरुत॥९२॥
अवयवरहितं कणभुक्परमाणुं वक्ति कारणं जगतः।
अनयोर्योगे द्व्यणुकक्रमतोऽस्तु जगच्छिवेच्छयेति मुधा॥९३॥
परमाणावणुकान्तरयोगः सर्वांशतो ऽथवैकांशात्।
किं न परस्परमनयोः प्रथमे पक्षे भवत्यहो लीनम् ॥९४॥
आणवमोक्षो नैवं मतमपरं चेन्निरंशता क्व गता।
पृच्छासहस्रतोऽस्मिन्ननवस्थादीन्विभावयेद्विद्वान् ॥९५॥
नास्तिकबार्हस्पत्यं सौगतमन्यं समाश्रयेद्यो वा।
सोऽदृग्गोलांगूलन्यायाद्दुःखांबुधेर्न मुच्येत ॥ ९६ ॥
मीमांसाकृत्पक्षे न व्यतिरिक्तार्थता क्रियातोऽन्या।
आम्नायस्य स कर्माणि फलदातृत्वं च पश्यतीशो न ॥९७॥
उपनिमुखस्य सदेः क्विपि चोपनिषच्छब्दनिष्पत्तेः।

श्रुतिमूर्धभिस्तज्ज्ञैरखण्डि युक्त्याऽनुभूतितस्त्वेतत् ॥ ९८ ॥
उत्पत्त्यसंभवादित्यस्मान्नोत्पद्यते पराज्जीवः ।
न च कर्तुः करणमिति स्मृत्या चासंगता ऽत्रराज्ञोक्तिः ॥९९॥
तस्माद्द्वैतं सगुणं त्यक्त्वाऽद्वैतार्यमाश्रयन्सतत्त्वम् ।
बुध्वाऽऽत्मानं विस्मृतगलमणिकल्पं विदेहमुक्तः स्यात् १००॥
बालाभिधमुनिभगवत्कृपया ऽसितकन्धराह्वविन्न्यस्ता ।
अद्वैतपारिजातावरजेयं जयतु चित्सुधाधारा ॥१०१॥

इति श्रीनीलकण्ठयमीन्द्रविरचिता चित्सु-
धाधारा समाप्ता ॥

---

## श्रीहरिभक्तिमरन्दः ।

माभीकाकृतकेष्टिदृष्टिसुमणिश्रेणीकृते संपणी-
कर्तुं चित्तविवर्तकाचमचिरादित्यत्परं यत्यते ।
यद्भृत्येन मया कयापि विधयाधेया कृपा तत्त्वया
हे विष्णो फलिनामृतोदयदशाकण्ठोक्तकारुण्यतः ॥ १ ॥
विष्णो त्वय्यधिविष्टपस्सम इति ह्यद्वैतमेवं सति
त्रातुं त्वत्कमलं न हृत्कमलमाभोगैः करोषीश किम् ।
नोचेद्यद्यज संत्यजात्र भवतो भृत्यं तु मा ऽऽहोस्विदीद्
त्वं वाथ त्यज पिष्टपाधिपतितां कारुण्यवारांनिधे ॥ २ ॥
पश्येयं तव रूपधेयमचलं यन्नित्यबोधात्मकं
स्वत्वेनाज यथा तथा कुरु विधिं श्रीकण्ठकण्ठप्रभ ।
त्रैयन्ताभिधसोदरोदरगिरां मार्द्वीकहृद्यां सदा
स्वादं स्वादमुदीतवृत्तिरवगित्येष प्रभो माऽव तत् ॥ ३ ॥

त्वामीतस्य हरे कृपापुरण भो बोधाम्तृतोदं तु हृ-
च्चेलक्रोपममुष्य येन ववृषे नित्य त्वया माधव ।
स त्वं मां सुखसिंधुसिन्धुरधुरीणं धेहि शीघ्रं कृपा-
जालेकृत्य लुनन्कलाकुलमहं नौमि त्रिलोकीपतिम् ॥ ४ ॥
हेशार्ङ्गिस्त्वदृते पचेलिमकृपाच्छ्रीनाथनाथं हरेः
पादांभोजसतीर्थ्यनिस्सृतमरन्दालिं प्रभो माऽवितुम् ।
कोऽन्यो भावमुपैतु देव तपदात्मान्तः पटीरात्मक
नो वित्सोऽहमुमाधवार्चितमिति त्वामेव सेवे सदा ॥ ५ ॥
क्वायं जाड्यवशंवदः क्व फणिराड्ब्रह्मादयुपश्लोक्यसु-
श्लोकस्त्वं भगवन्निशाकरकरस्पर्द्धिस्मितैत्यन्वहम् ।
जानन्नप्यरविन्दनाभ परवांस्त्वत्पादनिष्ठासरी-
सृष्टोद्यन्मुखरीकृतेरिति भणाम्येवं क्षमस्वाखिलम् ॥ ६ ॥
वैकुण्ठेशपयस्यमानचरितं लोकंपृणं साम्प्रतं
पायंपायमयं तु कौक्कुटिकहार्दानन्दविन्दं दधे ।
स्वान्तं कान्तपदेऽद्वितीयपरविद्याचुञ्चुमस्मिंस्ततः
कारुण्यामृतपूर्णदृग्भव भवज्वालाजलाधारग ॥ ७ ॥
स्वारामात्मदरीसुखासिक हरे मारागमारामभू-
देवेश द्युमणिप्रविष्ट यस मे नीरोगभावाप्तये ।
वृत्तिं मे विरचय्य हैमनसुधाकारांशुकल्पां पते
तत्त्वाऽहं शतशः परीत्य पदयोर्नम्रीभवाम्यच्युत ॥ ८ ॥
हे देवेज्य भवत्प्रसत्तय उपास्ति मेऽज भो ईयुषो
नित्यादीनवभञ्जनोत्सुकतया साक्षात्प्रसन्नो भव ।
शम्भुग्लेव्यपदद्वयं निरुपमं बन्धूकबन्धुं सदा
धारावाहकवृत्तिमात्रविषयं कुर्वेऽनुगृह्णीष्व माम् ॥ ९ ॥
यत्पादाब्जभवाभ्रगाङ्गसलिलं त्रैयक्षकैशयं जवा-

त्पूत्वाऽत्रत्यजनाघमर्षणविधौभागीरथी भासते।
कर्मन्दिप्रवरः प्रमथ्य यमथो नेयात्सविती गुहां
तं वन्देऽमृतसूसनाभिमधुरस्मेरास्यमिन्द्रानुजम् ॥ १० ॥
जम्भारिद्विपकुम्भविभ्रमिरमोरोजोपपीडं परी-
रम्भारंभदशाप्ततत्कठिनतासाक्ष्यं भजे वैभवम्।
श्रीवत्साङ्कितवत्समिङ्कितसुरागं तुङ्गमाङ्गल्यदं
यत्तद्रूपितहृत्प्रतय्य निजसत्संस्थां विदन्मुच्यते ॥ ११ ॥
इक्षुच्छायसहोदराच्युतकथावैतण्डिकायात्मभू-
भूतिर्माघवनी वनी च नहि किम्पाकाङ्घ्रिवद्रोचते।
यत्पत्स्पृष्टिवशादभूदुपलिता स्त्री योषितैकोपला
तं ह्योंं तत्सदिति त्रिभिः परपदैर्वित्तं सदा भावये ॥१२॥
द्राक्षीसन्ततिवाक्षु माक्षिकझरासूञ्छादगीर्ष्वक्षप-
द्राणिष्वाह च वाऽस्ति वस्तुविदितोपायस्त्वृतेसदृद्दशः।
तत्पश्चामृतदृष्टिनैष्ठिकमिमं तद्धारयाचिछ्द्य मे
गीरूढाशयमिन्दिराधवपदं विष्णो नमस्ये तव ॥ १३ ॥
सन्नाथान्तर बन्धुजीवसुमसामीचीन्यमङ्गाधरी-
कर्तुं नित्य तपस्यतीव कवितं यत्तेऽङ्घ्रिपङ्केरुहम्।
सोयं त्वज्जनहृज्जनैशिकतमोऽहोघस्मरार्कोदये
जत्पत्यच्युत तत्तदस्तु करुणां मत्कं सुखं रक्षितुम् ॥ १४ ॥
येद्राक्षीक्षवमृक्षितोक्तिपटवस्ते तेषु निष्ठा परा
दृष्टाऽऽभीरकुलैर्धिताम्र च वलाडडोढौक्यमाना त्वया।
कार्या कापि पतङ्गवङ्गियमिहृत्खेन्दो यया स्यात्कृती
वक्ता चैव दयापयोजलनिधे विश्वम्भराधोऽक्षज ॥ १५ ॥
अन्तश्शीतलतां हरे निरुपमां वावश्यमानोऽस्मिय-
द्भास्वन्मण्डलमण्डलस्थकिरणान्मूषत्पदं नौमि ते।

इत्थं तैमित्यधुरं धरास्य सुधितामादोद तन्नापरं
त्वत्तो वेद्मि मदीप्सितार्थघटने शोकापनोदात्मक ॥ १६ ॥
यत्प्रीत्यैन्दवरोचिषा त्रिजगती श्येतायते यत्पदं
बुध्वाऽत्रैतपरतां चिरन्तमुनिदेश्यः सर्व एकं तु तम् ।
भक्तानुग्रहबद्धदीक्षमितिवाग्दूरं त्वदूरं सतां
सर्पाधीश्वरदोषमुज्झिततमोदोषं मुकुन्दं भजे ॥ १७ ॥
कर्तुं यत्पदसात्स्वकान्तरखगं शेश्वीयमानेष्टिम-
त्स्वान्तोऽहं भगवत्कटाक्षमतुलं जालं वृणे साम्प्रतम् ।
दित्सन्प्राप्य तमेनमस्य सुखने पीयूषधारो भव
त्वं भद्रार्द्रसुदृग्घटाच्युत हरे दैनंदिनेष्टिं दधे ॥ १८ ॥
हे देवेश नखंपचोष्मलदरावाधातिदावानला
यन्मां त्वत्पदपङ्कजोदरमरन्देन्दिन्दिरं बाधते ।
तद्विष्णो भगवन्क्रियासमभिहाराभ्यस्तसंवित्तिम-
द्धृन्नाडिन्धम माऽत्र बन्धुपदवीं सन्धाय कारुण्यतः ॥ १९ ॥
चिन्मात्रात्मक कूलमुद्रुजरूप त्वामन्वहं निर्भिदं
विन्तेऽद्वन्द्वदशायमेतु सहजां तत्तारयुग्लक्षित ।
श्रीनाथस्य कटाक्षसन्ततिरमुष्मिन्नापपातं पत-
त्वश्रान्तं दिननाथसत्मग हरे तुभ्यं नमस्तत्कृते ॥ २० ॥
शिशुनाममुनिप्रवरान्तसदासितकण्ठसमाह्वयवाग्विवृतम् ।
हरिभक्तिमरन्दमिमं जपिता प्रग एष सुखीय इहापि मृतौ२१॥

# ॥ श्रीशिशुभगवत्पञ्चकम् ॥

इयनन्तपुरपत्तनोत्तम उपेत्य जन्मोत्तम-
ण्युदञ्चितकुलेऽजसंततिसमुल्लसच्छ्रीमुपि ।
गुरोर्वदननिस्सृताखिलकलाढ्यगस्त्यायितो
य एष भगवान्स मे गतिरिहास्ति बालभिक्षः ॥ १ ॥
अयन्क्रमपि सिद्धतापससमुमेशसेवात्तस-
च्चिदेकरुचिशोधितान्तरतयाऽऽप्य चाशीस्ततिम् ।
अवाप ह समस्तवित्त्वमपि दैवसञ्चोदितो य एष० ॥ २ ॥
विधाय पवितामटन्नवनिमेत्य सन्ध्यानदी-
पदोदितपदे ह्युकीत्प्रभृतिदृश्यभूतोऽभवत् ।
प्लवन्नुदजपत्रवद्दक उपाश्रितः प्लाविनीं य एष० ॥ ३ ॥
सुशोधितहृदन्तराचलदरीतमोऽपाकृता-
वुपारुण इवेक्षयाऽवति भवाब्धिमग्नाञ्जनान् ।
गुणैकनिलयोऽगुणी प्लुषितवस्त्रवत्संस्मृतो य एष०॥४॥
अनेकविधसिद्धिवस्त्यकयदङ्घ्रिरेणूत्किर-
त्कपालकुहरस्थसोमपगणास्समासन्परम् ।
श्रितोरुजननावसायकविधुः प्रसन्नाननो य एष० ॥ ५ ॥
बालाह्वभगवत्पादपञ्चकं यः पठेदिदम् ।
नैलकण्ठं स निर्मुक्तः स्वाराज्यमनुगच्छति ॥ ६ ॥

॥ हरिः ॐ ॥